संस्कृतवार्ताः

26.03.2024

सायम् - 06:20

<u>मुख्यवार्ता:</u>

· विदेशमन्त्री डॉ.एस्. जयशंकर: प्रोदीरितवान् यत् स्वकीय-राष्ट्रियसम्प्रभुतां यथावदेव स्थापयितुं फिलीपींसदेशस्य प्रयासानां भारतं समर्थनं विदधाति।

· श्रीलंकाया: राष्ट्रपति: रानिल विक्रमसिंघे भारतस्योपलब्धिं प्रशंसितवान् उक्तवान् च यत् भारतेन आंककीय-सार्वजनिक-आधारभूतसंरचना-क्षेत्रे कृतकार्याणां प्रतिकृति: श्रीलंकाया: हिताय वर्तते।

· भारत-राष्ट्रिय-समिते: नेत्री के.कविता दिल्ल्युत्पाद-शुल्क-नीति-प्रवंचना-सम्बद्धे धनशोधनप्रकरणे अप्रैलमासस्य नवम-दिनांकं यावत् न्यायिक-निगडने भविष्यति।

· जम्मूकश्मीरराज्ये वार्षिकीय -मरनाथयात्रार्थम् सर्वसज्जता समारब्धा।

· टेनिस इति प्रतिस्पर्धायां भारत-ऑस्ट्रेलियाई-देशयो: युगलं रोहनबोपन्ना मैथ्यू एबडेनश्च मियामी-मास्टर्स-ए.टी.पी. एकसहस्रं-प्रतिस्पर्धाया: पुरूष-युगलस्य प्रागुपान्त्यचक्रे समाविष्टवन्तौ।

<u>जयशंकर-फलीपीन्स</u>

विदेशमन्त्री डॉ.एस्. जयशंकर: प्रोदीरितवान् यत् स्वकीय-राष्ट्रियसम्प्रभुतां यथावदेव स्थापयितुं फिलीपींसदेशस्य प्रयासानां भारतं समर्थनं विदधाति। मनीलानगरे अद्य फिलीपींसदेशस्य विदेशमन्त्रिणा एनरिक-मेनालो इत्यनेन सह वार्ताहरान् सम्बोधन् डॉ.जयशंकर: सूचितवान् यत. प्रत्येकं देशस्य समीपे तस्य राष्ट्रिय-सम्प्रभुतां तदवदेव स्थापयितुम् अपि च क्रियान्वयनस्य अधिकारो वर्तते। ध्यातव्यं वर्तते यत् विदेशमन्त्रिण: वक्तव्यमिदं दक्षिणीय-चीन-सागरे चीनदेशेन सह फिलीपींसइत्येतस्य सागरीय-विवादस्य अनन्तरं प्रकाशे आगतम्। डॉ.जशंकर: सबलं प्रत्यपादयत् यत् भारतं आसियान-देशानां केन्द्रीयकरणं समन्वयनं ऐक्यभावश्च इत्येतेषां समर्थको वर्तते। विदेशीमन्त्री अग्रे उक्तवान् यत् भारतं नियमाधारित-शासनस्य कठोरानुपालनात् अस्मिन् क्षेत्रस्य सुदृढप्रगतौ समृद्धौ च विश्वासं वर्तते, एतस्मिन् प्रकरणे सागरीय-संविधानस्य अन्तर्गतं मान्यताप्राप्तस्य सागरीय-विधीनां सम्बन्धे संयुक्तराष्ट्रस्य

द्व्यशीत्यधिक-नवदशतमस्य यू.एम्.सी.एल्.ओ.एस्. इत्येतस्य घोषणाया: विशेषमहत्वं विद्यते। सम्पूर्णतया सह अस्य नियमस्य पालनं भवेत्।

<u>श्रीलंका</u>

श्रीलंकाया: राष्ट्रपति: रानिल विक्रमसिंघे उक्तवान् यत् भारतम् आगामिषु वर्षेषु विकासकेन्द्रं भविष्यति। भारतेन अंकीय-सार्वजनिक-आधारभूतसंरचना क्षेत्रे कृतानां कार्याणां प्रतिकृति: अथ तस्य सफलतायां विश्वास: श्रीलंकाया: हिताय वर्तते। एतत् वक्तव्यम् असौ अद्य कोलम्बो-नगरे भारतीयोच्चायोग-द्वारा आयोजिते अंकीय-सार्वजनिकाधारभूत-संरचानाधारिते सम्मेलने प्रदत्तवान्। श्री विक्रमसिंघे उक्तवान् यत् विगते वर्षे स्वीय-भारतयात्रावधौ असौ प्रधानमन्त्रिणा नरेन्द्रमोदिना सह श्रीलंकाया: समाह्वानेषु अवसरेषु च चर्चां कृतवान् तथा अंकीय-सार्वजनिक-आधारभूत-क्षेत्रस्य-तत्वानि आनयनस्य निर्णयं कृतवान्।

<u>कविता-बीआरएस</u>

भारत-राष्ट्रिय-समिते: नेत्री के.कविता दिल्ल्युत्पाद-शुल्क-नीति-प्रवंचना-सम्बद्धे धनशोधनप्रकरणे अप्रैलमासस्य नवम-दिनांकं यावत् न्यायिक-निगडने भविष्यति। अद्य प्रवर्तननिदेशालयस्य अभिरक्षणाविध-समाप्त्यनन्तर सा दिल्ल्या: न्यायालस्य सम्मुखे उपस्थिता जाता। प्रवर्तननिदेशालयेन कवितां पंचदशदिवसानां कृते न्यायिक निगडने प्रेषणस्य निर्णयानन्तरं राउज-एवेन्यू-न्यायालयस्य विशिष्टन्याययाधीश: कावेरी-बावेजा आदेशं पारितवती। प्रवर्तन-निदेशालयेन तर्क: प्रदत्त: यत् उत्पाद-शुल्क-नीति-प्रकरणे कविताया: भूमिकाया: परीक्षणं अधुनापि प्रचलति।

<u>बीजेपी-प्रदर्शन</u>

मद्यनीति-प्रकरणे दिल्ल्या: मुख्यमन्त्रिण: अरविन्द-केजरीवालस्य निगडनानन्तरं तस्य त्यागपत्रस्य अभ्यर्थनाम् आलक्ष्य भाजपादलेन। राष्ट्रिय-राजधान्यां प्रदर्शनं कृतम्। भाजपा दलस्य कार्यकर्तृभि: आईटीओ इत्येतस्मात् स्थलात् दिल्लीसचिवालयं यावत् पदयात्रा कृता। एतन्मध्ये आमआदमीपार्टीति दलस्य कार्यकर्तृभि: अपि दिल्ल्यां केजरीवालस्य निगडनम् आलक्ष्य विरोधप्रदर्शनं कृतम्।

## जम्मूकश्मीर-अमरनाथयात्रा

जम्मूकश्मीरराज्ये वार्षिकीय-अमरनाथयात्रार्थम् सर्वसज्जता समारब्धा। यतोहि जम्मूसम्भागस्य दशजनपदेषु स्वास्थ्य -प्रमाण- पत्राणां व्यवस्था क्रियते येन हि तीर्थयात्रिभ्य: निदिष्ट-तिथे: स्वीययात्राया: प्रारम्भणाय अनुमति: मेलितुं शक्यते। सम्पूर्णक्षेत्रस्य स्वास्थ्य-केन्द्रेभ्य: द्वादशाधिकैकशतं चिकित्सकेभ्य: अनिवार्य-स्वास्थ्य-प्रामणपत्र -प्रदानस्य कार्यं समर्पितमस्ति। यत् आभासिय-यात्रि-पंजीकरणाय आवश्यकं विद्यते। अवधेयं वर्तते यत् श्री अमरनाथ-श्राइन-बोर्ड इत्यनेन यात्राप्रारम्भस्य तिथि: जूनमासस्य नवविंशति दिनांकं प्रख्यापिता। यात्रि-पंजीकरणस्य स्पष्टतिथि: अग्रिमेषु दिनेषु कारयिष्यते।

## संयुक्तराष्ट्र-गाजा

अमेरिकाद्वारा स्वीय-विगत-स्थिते: अपाकरणे अस्योपाये वीटो इत्येतस्य उपयोग- नैव विहित: इत्यस्य प्रकरणस्यानन्तरं संयुक्त-राष्ट्र-सुरक्षा-परिषदा गाजायां तात्कालिकरूपेण युद्धविरामस्य आह्वानं कृतम्। परिषदा सर्वेषां बन्धकानां तात्कालिकरूपेण अप्रतिबन्धरूपेण च विमोचनस्य अभ्यर्थनं कृतम् । अनेकेषां असफलप्रयासानां पश्चादेव अक्टूबरमासे प्रारब्धस्य युद्धानन्तरं इदं प्रथमवारमस्ति यत् परिषदा युद्धविरामस्य समाह्वानं कृतमस्ति। अमेरिकाया: अयं पदक्षेप: गाजाक्षेत्रे इजराइलदेशस्य आक्रमणं निध्याय तस्य सहयोगिन: इजराइलस्य च मध्ये वर्धमानं मतभेदं संकेतयति।

## नागालैण्ड

पीपल्स-डेमाक्रेटिक-एलायस इत्यस्य प्रत्याशी डॉ.चुम्बेनमरी नागालैण्डस्य एकमात्र-लोकसभासनाय स्वीयनामांकनं कृतवान्। People's democratic alliance इत्येतदन्तर्गतं Nationalist democratic progressive party - bhartiya janta party - nationalist Congress party - janta dal - RPI (athawale) - LJP (ram vilas) - national people's party - Naga people's party - independent party इत्येतानि दलानि सम्मिलितानि सन्ति। भारतीय-राष्ट्रीय-कांग्रेस-दलस्य प्रत्याशी एस. सुपोंगमेरेन जमीर: अपि स्वीय नामांकन कृतवान्। नागालैण्डे आगामि-लोकसभा-निर्वाचनाय अधुना यावत् आहत्य त्रि-प्रत्याशिन: स्वीय- नामांकनं कृतवन्त:। प्रथमचरणीय-निर्वाचनाय नामांकनप्रक्रिया श्व: समाप्तो भविष्यति।

एशिया-भारतीयजलवायु:

एशिया-प्रशान्त-आर्थिक-सहयोग-जलवायुकेन्द्रस्य पूर्वानुमानानुसारि जुलाईमासत: सितम्बरमासं यावत् यदा प्रावृट्काल: स्वीयोच्चस्तरे भविष्यति। तदा भारते सामान्यत: अतिवृष्टि: सम्भाव्यते। जलवायु- केन्द्रेण भारताय प्रावृट्कालस्य अस्य वर्षस्य प्रथम: पूर्वानुमान: प्रख्यापित:। एतस्मिन् पूर्वानुमाने अप्रैलमासत: जूनमासपर्यन्तम् अथ च जुलाईमासत: सितम्बरमासं यावत् सामकलनद्वयं पृथगेव प्रख्यापित:। तत्रैव एल् नीनो इत्यत: ला नीना इत्येतस्य स्थितिषु परिवर्तनस्य वार्ता कथिता।

ऋतुविज्ञान

भारतर्तु-विज्ञान-विभागेन उक्तं यत् अद्य अरूणाचल प्रदेश-असम-मेघालयेषु अतिवृष्ट्या: सम्भावना वर्तते। सूच्यते यत् नागालैण्ड-मणिपुर-मिजोरम-त्रिपुरा-सिक्किम-उपहिमालयीय-पश्चिम बङ्गाल-गांगीय-पश्चिमबङ्गालेषु अद्य सामान्यवृष्टि: भविष्यति।

टेनिस्-प्रतिस्पर्धा

टेनिस इति प्रतिस्पर्धायां भारत-ऑस्ट्रेलियाई-देशयो: युगलं रोहनबोपन्ना मैथ्यू एबडेनश्च मियामी-मास्टर्स-ए.टी.पी. एकसहस्रं-प्रतिस्पर्धाया: पुरूष-युगलस्य प्रागुपान्त्यचक्रे समाविष्टवन्तौ। एतौ क्रीडकौ ह्य: रात्रौ मोनेगास्क-पोलिश-इत्यनयो: युगलं सप्त पंच सप्त षड् इत्यंकेन पराजितम्।

।। इति वार्ता: ।।